AGLASEM.COM

Uttarakhand Board
Question Paper

CLASS 10



रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : **8**

028

228 (HGF)

2023

संस्कृतम्

(केवल प्रश्नपत्रम्)

अवधि : होरात्रयम्] **[पूर्णांक : 80**

निर्देश : (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने एव लेखनीयानि।

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।

(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

खण्ड - 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

महाकविः कालिदासः संस्कृतवाङ्मयस्य श्रेष्ठः कविः आसीत्। सः त्रीणि नाटकानि लिखितवान्। तेषु अभिज्ञानशाकुन्तलम् अति प्रसिद्धं नाटकम् अस्ति। अस्मिन् नाटके सप्त अङ्काः सन्ति। अस्य विषये केनचित् कविना उक्तम् - "काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला"। अस्य नाटकस्य नायकः दुष्यन्तः नायिका च शकुन्तला। दुष्यन्तः हस्तिनापुरनरेशः, शकुन्तला मेनकायाः पुत्री चासीत्।

(क) एक पदेन उत्तरत – $1 \times 2 = 2$

(i) महाकविः कालिदासः कस्य वाङ्मयस्य श्रेष्ठः कविः आसीत्?

(ii) अभिज्ञानशाकुन्तले कति अङ्काः सन्ति?

(ख) पूर्णवाक्येन उत्तरत- 1

(i) शाकुन्तलं विषये केन किं कथितम्?

(ग) निर्देशानुसारम् उत्तरत - $1 \times 2 = 2$

(i) 'तत्र' इति पदस्य विलोमपदं लिखत।

(ii) 'लिखितवान्' इति क्रियापदस्य कर्तृपदं लिखत।

schools.aglasem.com

aglasem.com

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

पिपासया पीड़ितः एकः काकः इतस्ततः भ्रमति स्म। अन्ते सः एकस्मिन् स्थाने घटम् अपश्यत्। घटम् दृष्ट्वा सः प्रसन्नः भूत्वा तस्य समीपे गतवान्, परं घटस्थितं जलम् अतिन्यूनम् आसीत्। अतः स जलं पातुं समर्थः न अभवत् । यत्र ध्येयः निश्चितः तत्र काऽपि बाधा न भवति। इति मत्वा सः कमपि उपायम् अचिन्तयत् । घटस्य समीपे स्थितानि पाषाणखण्डानि उत्थापयित्वा सः घटे अक्षिपत्। तस्य प्रयत्नेन घटस्य जलम् उपरि आगच्छत् । सः शीतलं जलं पीत्वा सुखम् अन्वभवत् प्रसन्नः भूत्वा उदपतत् च।

(क) एक पदेन उत्तरत - 1×2=2

(i) कया पीड़ितः काकः इतस्ततः अभ्रमत्?

(ii) सः किं पातुं समर्थः न अभवत्?

(ख) पूर्णवाक्येन उत्तरत - 1×2=2

(i) काकः केन कारणेन घटस्य जलं पातुं समर्थः न अभवत्?

(ii) किं मत्वाः सः उपायम् अचिन्तयत्?

(ग) यथानिर्देशम् उत्तरत - 1×2=2

(i) 'अन्वभवत्' इति पदे कः उपसर्गः अस्ति?

(ii) 'पातुम्' इत्यत्र कः प्रत्ययः?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1

खण्ड - 'ख' (रचनात्मकं लेखनम्)

3. पठन-पाठनस्य प्रगतिसम्बन्धे पितरं प्रति लिखिते अस्मिन् पत्रे उचितपदैः रिक्तस्थानानि पूरयित्वा उत्तर पुस्तिकायां लिखत, सहायतायै मञ्जूषायां पदानि दत्तानि सन्ति। 1×4=4

चण्डाकः

दिनाङ्का : 28-10-2022

श्रद्धास्पदपितृचरणेषु

सविनयं प्रणामाञ्जलिः।

अहमत्र कुशली। .....तत्रापि सर्वे कुशलिनः। मम अध्ययनं सुचारूतया प्रचलितः। कक्षा - परीक्षासु समुत्तीर्णो जातः। यद्यपि सर्वेषु विषयेषु ..... अङ्का समधिगता तथापि गणिते काऽपि न्यूनता वर्तते। ..... गणितस्य कृते विशेषरूपेण ..... दास्यामि।

मातृचरणेभ्यो नमः । अनुजायै स्नेहः।

भवतां पुत्रः गौरिकः

मञ्जूषा - सम्प्रति, समयं, सन्तोषप्रदा, आशास्यते

schools.aglasem.com

aglasem.com

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितसंवादं पूरयित्वा लिखत – 1×4=4

सुरभिः – तव नाम .....?
गौरिकः – मम ..... गौरिकः।
सुरभिः – गौरिकः त्वं किं .....?
गौरिकः – सुरभे .....पठामि।

मञ्जूषा - अहम्, नाम, करोषि, किम्

5. 'अस्माकं देशः' इति विषयम् अधिकृत्य निम्नांकितशब्दसूचीतः शब्दान् चित्वा **चत्वारि** वाक्यानि लिखत : 2×4=8

मञ्जूषा - भारतम्, उत्तरस्यां, शोभते, अत्र, प्रवहति, साधवः

खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

6. अधोलिखितेषु रेखांकितपदेषु सन्धिं / सन्धि-विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3

(क) सत् + चरित्रः जनः पूज्यते।
(ख) वने मृगाः + चरन्ति।
(ग) जय जगदीशः हरे।

7. रेखांकितपदेषु समासं / समास विग्रहं कृत्वा लिखत– 1×3=3

(क) ग्रामस्य समीपं नदी वहति।
(ख) माता च पिता च आगच्छतः।
(ग) चतुराननः सृष्टिविधाता अस्ति।

8. रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत- 1×3=3

(क) भारते अनेकानि दृश् + अनीयर् (बहुवचन) स्थानानि सन्ति।
(ख) त्वया सन्तुलितः आहारः कृ + तव्यत्।
(ग) पुरस्कारं लभ्+शानच् छात्रः प्रसन्नः भवति।

9. मञ्जूषायाः सहायतया निम्नलिखितानि वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत- 1×3=3

मञ्जूषा - इतस्ततः, वृथा, श्वः

(क) मम भ्राता ----------आगमिष्यति।
(ख) स्वकार्यं कुरू --------मा भ्रम।
(ग) ------- भाषणं न कुरू।

schools.aglasem.com
aglasem.com


10. अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3

(क) अहं भोजनं करोमि।


(ख) तेन नाटकं दृश्यते।

(ग) त्वं संस्कृतं पठसि।


11. घटिकां दृष्ट्वा संस्कृत पदेषु समयं लिखत, भूवत्सला कदा किं करोति ? 1×4=4

(क) 


5:00 बजे प्रातः

(ख) 

8:45 बजे

(ग) 

4:30 अपराह्न

(घ) 

10:15 बजे रात्रि

(क) भूवत्सला प्रातः ..... वादने स्वाध्यायं करोति।

(ख) सा ..... वादने विद्यालयं गच्छति।

(ग) सा अपराह्णे ..... वादने गृहम् आगच्छति।

(घ) भूवत्सला रात्रौ ..... वादने शयनं करोति।

12. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानपूर्तिः संस्कृतेन कृत्वा पुनः उत्तर पुस्तिकायां लिखत- 1×2=2

(क) मम विद्यालये (17) .....अध्यापकाः सन्ति।

(ख) मम ग्रामे (99) .....भवनानि सन्ति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत- 1×3=3

(क) पुष्पाणि <u>विकसतः</u> ।

(ख) मोहनः मम <u>मित्रः</u> अस्ति।

(ग) <u>धनस्य</u> बिना सुखं न भवति।

schools.aglasem.com

aglasem.com

खण्ड - 'घ' (पठित अवबोधनम्)

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत -

यद्यपि दैवः प्रकोपो भूकम्पो नाम, तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते। प्रकृति समक्षमद्यापि विज्ञान गर्वितो मानवः वामनकल्प एव तथापि भूकम्परहस्यज्ञाः कथयन्ति यत् बहुभूमिकभवननिर्माणं न करणीयम्।

(क) एकपदेन उत्तरत– 1

(i) दैवः प्रकोपः नाम किम् ?

(ख) पूर्णवाक्येन उत्तरत– 1×2=2

(i) कीदृशः मानवः वामनकल्प एव अस्ति?

(ii) कस्य स्थिरोपायो न दृश्यते?

(ग) निर्देशानुसारम् उत्तरत– 1×2=2

(i) अनुच्छेदे 'बौना' इति शब्दस्य कृते किं शब्दं प्रयुक्तम् ?

(ii) 'दानवः' अस्य विलोमपदं गद्यांशात् चित्वा लिखत।

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।।

(क) एकपदेन उत्तरत- 1

(i) कस्य बलं न वेत्ति मूषकः।

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) बलं कः वेत्ति कः न वेत्ति?

(ii) वायसः कस्य गुणं न वेत्ति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'गुणी' इति पदस्य विलोमपदं किम् अत्र प्रयुक्तम्?

(ii) 'कोकिलः' इति पदस्य पर्यायवाचिपदं श्लोकात् चित्वा लिखत।

schools.aglasem.com
aglasem.com

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

चाणक्यः - कथं न ज्ञायते नाम? भो श्रेष्ठिन् ! शिरसि भयम् , अतिदूरं तत्प्रतिकारः।

चन्दनदासः - आर्य ! किं मे भयं दर्शयसि? सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्?

चाणक्यः - चन्दनदास ! एष एव ते निश्चयः?

चन्दनदास : - बाढम् एष एव मे निश्चयः?

चाणक्यः - (स्वगतम्) साधु ! चन्दनदास साधु।
सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

(क) एकपदेन उत्तरत- 1

(i) चाणक्यः किं दर्शयति चन्दनदासम्?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) चन्दनदासः किं निश्चयम् अभिव्यक्तति?

(ii) चाणक्यः चन्दनदासं साधु मानयन् किं कथयति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'इदं दुष्करं कुर्यादिदानीं शिविना विना' अत्र क्रियापदं किम्?

(ii) 'दुर्लभेषु' अस्य विलोमपदं नाट्यांशात् चिनुत।

17. अधोलिखितयोः श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत -

(क) व्यायामं कुर्वतोनित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते।। ½×4=2

भावार्थ :-

यः ..... नित्यं ..... करोति, तं विदग्धम् ..... वा विरुद्धम् अपि ..... सुखेन परिपच्यते।

(ख) सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा।। ½×4=2

भावार्थ :-

महतां ------- विपत्तौ च ------ भवति। यथा सूर्यः / सविता -------- रक्तः भवति तथा अस्तमये च ..... भवति।।

schools.aglasem.com
aglasem.com

18. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत-

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।। ½×2=1

अन्वय :–

हि मनुष्याणां शरीरस्थः महान् रिपुः ..... अस्ति।

उद्यमसमः ------ नास्ति, यं कृत्वा न अवसीदति।।

(ख) एक एव खगो मानी वने वसति चातकः।

पिपासितो वा म्रियते याचते वा पुरन्दरम् ।। ½×2=1

अन्वय :–

एक एव मानी खगः चातकः, ------ वसति।

पिपासितः म्रियते वा पुरन्दरम् -----।।

19. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत – ½×4=2

(क) चातकः वने वसति।

(ख) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

(ग) चौरः कर्पटम् क्षिप्त्वा निर्गतः।

(घ) तत्र राजसिंहो नाम राजपुत्रः वसति स्म।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत- ½×6=3

(i) अस्ति देउलाख्यो ग्रामः।

(ii) एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

(iii) अयमेकः तावद् विभज्य भुज्यताम् ।

(iv) मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

(v) तत्र राजसिंहः नाम राजपुत्रः वसति स्म।

(vi) सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद् -"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ?

schools.aglasem.com

aglasem.com

21. निम्नांकित शब्दानां संस्कृतेन वाक्यप्रयोगं कुरुत- 1×2=2

(क) हिमालयात्

(ख) परोपकारः

*****

schools.aglasem.com

aglasem.com